कादम्बरीकथाटीका

२६४

१९ पत्राणि

St. cat से २ पत्र अधिक हैं

N.A.

F. 79

Double # 10

18/19

5.12.92

काव्य वस्ता ३

~~दशकुमार भूषण~~

कादम्बरीटीकेयम्

२०

॥श्रीमन्महागणाधिपतये नमः॥ ॥आसीदिति। अशेषनरपतयः। राजपक्षे वर्त्तमानाः इंदुपक्षे नक्षत्रा
दयः। पाकशासन इंद्रः। मालापंक्तिः मालानुपंक्तौ पुष्पादिदामनीति मेदिनी। प्रतापानुरागाभ्यां अवनतं नम्रं
सामंतचक्रं यस्मात्। माघोपि। तेजःक्षमा वा नैकांतः कालज्ञस्य महीपतेः। नैकमोजः प्रसादो वा रसभाववि
दः कवेरिति। राजानुप्रणताशेषसामन्तः स्यादधीश्वर इत्यमरः। सामन्ताभाषयाप्रसिद्धमवासपदवाच्या
राजानः। अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं॥ सामंतसंभावनयैव धीरः कैलास
नाथं तरसा जिगीषुरिति कालिदासः। एतेन शूद्रकस्याधीश्वरत्वमुक्तं। चक्रवर्त्ती सार्वभौमः। रेखाकु
तशंखचक्रलांछनः। जितमन्मथः जितकामः कामानधीनः। शक्तिरायुधं सामर्थ्यं च। विमानीकृतं सर्वो
ल्लुष्ठावयमिति चित्रौन्नसरहितं कृतं च्युतं राजहंसानां मंडलं। स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः॥ सिंह
शार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचरा इत्यमरः आदिपदग्राह्यः श्रेष्ठवाचकोहंसशब्दः। पक्षे विमानीकृतं रामः

गाहनीकृतं राजहंसानां मंडलं। राजहंसास्तु ते चंचुचरणैर्लोहितैः सिता इत्यमरः। विमानो व्योमयानं च सप्तभौम
गृहेपि च। घोटके यानमात्रे च पुंनपुंसकयोर्मत इति मेदिनी। लक्ष्मीः श्रीः पक्षे शोभा। भगी श्रीमान् रथ इव पथ
प्रवृत्तो रथपथप्रवृत्तः। यथा रथः स्वमार्गेणैव गच्छति तथायं स्वपित्रादिकल्पितव्यवहारेण प्रवृत्तो न तु न्या
र्गगंता। भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वित्यमरः। वाटः पथश्च मार्गश्चेति त्रिकांडी। [redacted] पादाः प्रत्यंतपर्वताः पक्षे चरणौ। दानं मदजलं पक्षे वितरणं। क
रो हस्तः पक्षे शुंडा। करो वर्षोपले पाणौ रश्मौ प्रत्ययशुंडयोरिति। अत्र चक्रधरादौ काव्यप्रकाशरीत्या स
मासगा श्रौत्युपमा। चंद्रालोकरीत्या पूर्णोपमा। गुहेकाव्यादर्शरीत्या श्लेषोपमा। ब्रह्मलिकाव्यादर्शरीत्या
समानोपमा। अलंकारशेखररीत्या श्लेषोपमा। एवमग्रेपि यथासंभवमुपमाभेदा अवगंतव्याः। आदर्शः
मुकुरः। दर्पणे मुकुरादर्शावित्यमरः। मित्रः सूर्यः पक्षे सखा। मित्रं सुहृदि सङ्गे सूर्ये पुंसीति मेदिनी। गोष्ठीवं

धानां। गोष्ठीसभायां संलाप इति विश्वप्रकाशः। धनुष्मतां धन्विनां। धन्वी धनुष्मान् धानुष्क इत्यमरः। प्रत्यादेशः निरा
करणं। प्रत्यादेशो निराकृतिरित्यमरः। धौरेयः धुरीणः। धुर्वहे धुर्यधौरेयधुरीणा इत्यमरः। धुरो यड्ढकाविति ठक्
। विनता गरुडमाता। पक्षे नम्राः। वैण्यः पृथुः॥ आदिराजः पृथुर्वैण्य इति त्रिकांडी। नाम्नैव भिन्नारातिहृदयः
। नृसिंहस्तु नरवैरिति व्यतिरेकः। उपहाससंभावनायां वीजं। विक्रमः पराक्रमातिशयः। विक्रमस्त्वतिशक्ति
ते इत्यमरः। पक्षे विक्रमः विशिष्टः पादविक्षेपः। कृपाणः करवालः। धारा धार इति भाषायां। तत्र जले। करवालः
कृपाणवदित्यमरः। खड्गादीनां च निशितमुखे धारा प्रकीर्तितेति विश्वः। मनस्विवमताधर्मादिना नारायण
स्यानुकरोति· तमनुकरोतीत्यर्थः। कर्मणः शेषत्वविवक्षायां षष्ठी। यस्य समीपं· प्रसकृत् वारंवारं आजगा
म राजलक्ष्मीः। सकृत्सहैकवारे चेत्यमरः॥ नव्यूतं निर्गतं। दंतुरेण विषमांतरेण। दंतुरं वा व्यवहिंघ्या दंतुरे
विषमांतर इति विश्वप्रकाशः। दंत उन्नत उरच्॥ सुभटानां युद्धप्रवीण प्रतिपक्षभूपानां उरःकपाटेन विघ

रितोऽवहितः क्रूरसहस्रोरविर्यस्मात्तादृशांधकारमध्यवर्तिनी। करटोगजगंडः। काकेभगंडौ करटाविल्य
मरः। धारासंपात आसारः। मेघच्छन्नेह्नि दुर्दिनमिति चा। रतार्थिनीतु संकेतं याति याभिसारिकेति रस
रत्नहारः। दिथसुः द्युमितुः। दिवानिशमहोरात्रं। यस्मिन्राजनि जगति परिपालयति। चित्रकर्मसु आले
पं८ ख्यकर्मसु। आलेख्याश्चर्ययोश्चित्रमित्यमरः। वर्णसंकरः शुक्लादिवर्णसंकरः। वर्णो द्विजादौ शुक्लादौ वि
त्समरः। वर्णो द्विजादौ शुक्लादौ यशोगुणकथासु चेति मेदिनी। न प्रजानां वर्णानां ब्राह्मणादीनां। परिसंख्या
लंकारः। किंचित्पृष्टमपृष्टं वा कथितं यत्प्रकल्प्यते॥ तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृतेति काव्यप्र
काशलक्षणात्। सुरते केशग्रहणं नान्यत्र। गावबंधाः। बंधस्त्वाधौ बंधने चेति मेदिनी। स्वप्ने निद्रायां
स्यान्निद्राशयने स्वापः स्वप्नः संवेश इत्यपीत्यमरः। विप्रलंभो वियोगः। रागः गेयप्रसिद्धः। पक्षे रागो मात्स
र्यं। रागोनुरक्ते मात्सर्ये शुक्लादौ लोहितादिषु इति विश्वप्रकाशः। गुणाः प्रसिद्धाः दाक्षिण्यादयः। पक्षे मौर्वी

गुणो मौर्व्याम् अप्रधाने रूपादौ सूदइंद्रिये इति मेदिनी॥ जालमार्गः। जालं गवाक्ष-आनाये कोरके दंभवृंदयोरि
3 ति विश्वप्रकाशः। कलंकः। कलंकोंके पवादे च कालायसमलेपि चेति मेदिनी॥ धार्यक्षेषु। धार्यक्षोपकरणे
षु। पर्यालोक्षोपकरणे धात्रिःशाकुनिकांतरइति त्रिकांडी। पणो क्षेषु ग्लहो क्षास्तु देवनाः पाशकाश्च तइ
त्यमरः। [illegible] पण्येत्यादि। परलोकान्नशत्रुजनादित्यार्थः परिसंख्या। अंतःपुरिका- अंतःपुर
स्त्रियः। भंगः कुटिलता। भंगस्तरंगे कौटिल्ये रुग्विशेषे पराजये इति महीपः। करग्रहणं। करो राज
ग्राह्यभागः। पक्षे हस्तः। कशाभिघातः कशाया ताडनं- अश्वादेस्ताडिनी कशेत्यमरः। मकरध्वजे कामे
चापध्वनिः युद्धशब्दः। चापः पवनयुद्ध्योरिति विश्वप्रकाशः। यद्वा चापे पुष्परूपे ध्वनिः शब्दः भ्रमरकृतः
अन्यस्य धनुषः शब्दाभावोऽपगतवीर्यत्वात्। तस्य पश्चाद्धकस्य विदशाभिधाना नगरी- आसीदित्यन्वयः।
कलिकालेत्यादि नगरीविशेषणं। प्रसवयुक्तास्ति। मज्जन्नित्यादि वेत्रवत्या विशेषणानि। आस्फालनं·

रामः

ताडनं।अवगाहनंस्नानं।संध्यादावाचरितंसंध्यायमानं।कूलंतीरं।कूलंरोधश्चतीरंचेत्यमरः।सइतित
स्यामुवासेत्यन्वयः।वलयमिवकटकमिव।कटकौवलयौस्त्रियामित्यमरः।अमरगुरुंबृहस्पतिं।अनु
श्रैर्निस्पृहैः।स्निग्धैरनुरागवद्भिःप्रबुद्धैर्ज्ञानवद्भिः।अमात्यविशेषणानि।कामंदकः।कुलीनाःशुनाःशुच
यःशूराःश्रुतवंतोनुरागिणः।।दंडनीतेःप्रयोक्तारःसचिवास्युर्महीपतेः।।कृतशिल्पश्चदक्षश्चप्रज्ञावान्
धारणान्वितः।।दृढभक्तिरकृत्त्वविशाणांसचिवोभवेदिति।।मित्रविशेषणं हा।मूर्द्धाभिषिक्तःक्षत्रियः।मू न्या ५
र्द्धाभिषिक्तोराजन्योबाहुजःक्षत्रियइत्यमरः।पार्थिवाराजानः।कठोरमतिभिःपूर्णबुद्धिभिःदृढबुद्धिभिर्वा।
।तस्यातिथेषइवासीदित्यन्वयः।स्त्रैणंस्त्रीसमूहः।स्त्रीपुंसाभ्यांनञ्स्नञौभवनादितिनञ्।रतिःकामस्त्री
।लावण्ययतिमुक्ताफलेच्छायायास्तरलत्वमिवांतरा।।प्रतिभातियदंगेषुतल्लावण्यमिहोच्यतइतिकेश
वः।अवरोधजनेअंतःपुरस्त्रीजने।शुद्धांतश्चावरोधश्चेत्यमरः।हेलायमानंहेलायतेतद्धेलायमानंचंच

लमित्यर्थः। घर्घरिका वाद्यविशेषः। रणरणायमानं अव्यक्तानुकरणं। आसारः वाणधारासंपातः। धारासं
पात आसार इत्यमरः। आख्याने इत्यादि। आख्यायिकाख्यायिकोपलब्धार्थे इत्यमरः। इतिहासः इतिह
सः पुरावृत्तमित्यमरः। पुराणं पंचलक्षणमित्यमरः। अत्र सर्ग इति दशलक्षणं वा। आख्यानाख्यायिके
तत्र मनोरमायां वासवदत्तेति प्रतीकमुपादाय गद्य रूपो ग्रंथविशेष आख्यायिके सधिसूत्रस्थते ग्रं
थ इति सूत्रे हरदत्त इति दीक्षिताः। अत्रैव मस्करी तु गद्यपद्यरूपो ग्रंथ इत्युक्तवान्। तदुभयमपि न प्रीतिज
नकं विदुषां। संस्कृतभाषालिखितपत्रेति आमं· वृत्तांतस्य तथापि ग्रथनात् द्वितीयं तु च पूर्वलक्षणं। गद्य
पद्यमयी काऽपि चंपूरित्यभिधीयत इति काव्यादर्शे। अपादः पदसंतानो गद्यमाख्यायिका कथा॥ इति त
स्य प्रभेदौ द्वौ तयोराख्यायिका किल। नायकेनैव वाच्यान्या नायकेनेतरेण वा॥ स्वगुणाविष्क्रिया दोषो
नास्ति भूतार्थशंसिनः॥ अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात्। अन्यो वक्ता स्वयं वेति कीदृग्वा भेदका

रामः
४

रणं ॥ वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम् ॥ चिह्नमाख्यायिकायाश्चेत्प्रसंगेन कथास्वपि ॥ आर्यादिवत्प्रवे
शः किं न वक्त्रापरवक्त्रयोः ॥ भेदश्च दृष्टो लंभादिरुच्छ्वासो वास्तु किं ततः ॥ तत्कथाख्यायिकेत्येका जातिर्नाम
द्वयान्विता इति च ॥ तस्माद्वक्त्रापरवक्त्रोच्छ्वासलंभकान्विता नायकेनोक्ता गद्यपद्यमयी स्ववृत्तान्विता वाऽऽख्या
यिका ॥ एवं स्थिते वाल्मीकेये रामायणे बालकांडप्रथमसर्गाष्टनवतितमश्लोके एतदाख्यानमायुष्यं पठन्रामा
यणं नरः इत्यत्र आख्यानमिति प्रतीकमुपादाय॰ आख्यायिके सर्वकथनं न प्रामाणिकतामाप्नोति॰ आख्या
नाख्यायिकयोर्भेदात् सति पर्यायत्वे आख्यानाख्यायिकेतिवार्त्तिककृदुक्तिर्व्यर्था स्यात्॰ अन्यैराचार्यैरन्य
तरानुक्ते रवर्णनाच्च ॥ अक्षरच्युतकमित्यादि॰ अक्षरच्युतकं यथा ॥ महानपि कुलीनोपि चतुरत्नयुतोपि सन् ॥
विरसः कुपरीवारो न दीनः केन सेव्यते ॥ नदीनामिनः प्रभुः समुद्रः नकारच्युतौ त्वेवंविधः दीनः केन सेव्यत इति॰ हृपणः २
मात्राच्युतकं यथा ॥ मूलस्थितिमधः कुर्वन्पात्रैर्जुष्टो गताक्षरैः ॥ विटः सेव्यः कुलीनस्य तिष्ठतः पथिकस्य च ॥

अत्र पात्रैरित्यत्राकारस्य वनादित्वपराहिकारस्य वनासत्रैर्वरइत्यर्थान्तरं भवति। गूढचतुर्थपादो यथा। रघोः कु
कवेः किं समरस्य सारं कृषेर्भयं किं किमु शंसन्ति भृंगाः॥ रवलाद्रयं विष्णुपदं च केषां भागीरथीतीरसमाश्रितानामि
ति॥ बिंदुच्युतकं यथा॥ त्रिनयनचूडारत्नं मित्रं शंभोः कुमुद्वतीदयितः॥ अयमुदयति घुसृणारुणतरुणीव
दनोपमश्चंद्रः॥ अत्र कुमुद्वतीमित्रं संयोजने कुमुद्वतीमुदयतीति भवति॥ प्रहेलिका गूढाभिप्रायं प्रहेलिका॥
पानीयं पातुमिच्छामि त्वत्तः कमललोचने॥ यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहमिति॥ एकदेशस्थिति·
॥एकस्मिन् समये प्रतीहारी राजानं सविनयमब्रवीत् इत्यन्वयः॥ सूर्योदयं वर्णयति नातीसादि।·आस्थानं·
आस्थानी क्लीवमास्थानं स्त्रीनपुंसकयोः सदइत्यमरः॥ कौक्षेयकेण कृपाणेन·कौक्षेयको मंडलाग्रः करवा
लः कृपाणवदित्यमरः॥ सन्निहितविषधरा चंदनलतेव भीषणा रमणीया आकृतिर्यस्याः सा शरदिव कलहंसै
र्धवलमंबरमाकाशं यस्यां· पक्षे कलहंसवद्धवलांबरा श्वेतवस्त्रा। परशुधारेव· परश्वधः परशुरिति शस्त्रभेदः। पर

भुस्लकपरश्वध इत्यमरः। विग्रहिणी मूर्त्तिमती। शरीरं वर्ष्म विग्रहः इत्यमरः। सुवेत्रवती सुंदरवेत्रयष्टिः। पक्षे वेत्र
वती नदी। भाजनं पात्रं। विहंगमः पक्षी। खगे विहंगविहगविहंगमविहायस इत्यमरः। गमेः सुपि वाच्य इति ख
च् खच्च डिद्वा वाच्य इति वैकल्पिकं डित्वं। विहायसो विह इति विहादेशो मुम्॥ अथेति। प्रतीहारी द्वारपालस्त्री। प्र
तीहारे द्वारपालद्वाःस्थद्वाःस्थितदर्शका इत्यमरः॥ प्रविश्येति। सा मातंगकन्या राजानमद्राक्षीदित्यन्वयः॥ सा
प्रतीहारी सुक्तिस्कप्रामादिकी। अशनिर्वज्रम्। दंभोलिरशनिर्द्वयोरित्यमरः। कनकशिखरी। सुमेरुः। जाल
मेघजालकः। इंद्रायुधं शक्रधनुरित्यमरः। वितानविशेषणं न्याहा। अवलंबितेत्यादि। मुक्ताकलापः समू
हः। कलापः संहतो बर्ह इति मेदिनी। गगनसिंधुर्मंदाकिनी। पर्यंकिकाल्पमंचकः। अल्पेर्थे कन्। शयनं मंचप
र्यंकपल्यंकाः इत्यमरः। स्फाटिकपादपीठे पीठं प्रांत इत्यर्थः। उन्मयूखमुखकांतिविजयपराभवप्रणतेन श
शिनी वेत्युत्प्रेक्षा। उपमोक्तिस्कप्रामादिकी। विन्यस्तवामपादं। आनतांगुलिमित्यादिरस्या। इंद्रनीलमणि

कुट्टिमप्रभासंपर्कश्यामायमानः। कुट्टिमोऽस्त्री निबद्धा भूरिति। तत्कुण्डलालंकारः। पद्मरागखचितरत्नपाटलीकृतेनारु
णेन। अत्रापि सर्वथैवालंकारः। [redacted]। भावां जटिनयनाग्निमलिनेन परिप्लुता
॥ तथैवास्त्रा भगवता शंखचक्रगदाभृता॥ छलाच्चक्रेण वैछिन्ने जघने शिरसी तयो। मिमार्कंडेयपुराणे
कथा। अनर्जितां तदंशोत्कंपितप्रांते। दशोदति पाठे तु दशा वस्त्रा। दीपवर्त्यो वस्त्रप्रांत इति मेदिनी। वस्त्रानंदधा
नं। उपरिविन्यस्तकुसुमस्यामलं। चर्चा तु चार्चिक्यं स्यात् स्मक इत्यमरः। छापा इति भाषायां। अंतरांतरा मध्ये
मध्ये। परिवेषः। परिवेषस्तु परिधिरुपसूर्यकमंडले इत्यमरः। निगडशंकां। अथ श्रृंखला। अंदुको निग
डोऽस्त्री स्यादित्यमरः। केयूरयुगलेनांगदयुगलेन। केयूरमंगदं तुल्ये इत्यमरः। उन्नतघोणं। घोणा नासा च
नासिके त्यमरः। कलधौतपट्टापतं। कलधौतं सुवर्णं। कलधौतं रूप्यहेम्नोरित्यमरः। पट्टः पेषणपाषाणे व्रणा
दीनां च बंधने। चतुष्पथे च राजादिशासनांतरपीठयोरित्यमर इति केषांचिदुक्तिः। शिं स्या। तत्रानुपलंभा

रामः

६

विश्वमेदिन्यामितितु सम्यगेव ॥

न्॰ ऊर्णा॰ भ्रुवोरन्तरावर्त्तः। ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोरित्यमरः। आभरणानां स्वर्णाभर
णानां प्रभाभिः कान्तिभिः पिशंगतया पीततया जग्ध हरकृताशमिव॰ जग्ध शिवनेत्राग्निवचार विलासिनी
भिर्वारस्त्री गणिकावेश्ये इत्यमरः। वसुंधरया॰ पृथिव्या॥ विरोधाभासे नाह॰ अशेषेत्यादि। विरुद्धानां पदा
र्थानां यत्र संसर्गदर्शनं॥ विशेषदर्शनायैव स विरोधः स्मृतो यथेति काव्यादर्शे विरोधः। आभासत्वे वि
रोधस्य विरोधाभास इष्यत इति चंद्रालोककारी। अविरोधाभासः। एतदन्यसमये अनन्यवर्त्तिन्या अशे
षनरपतिभुक्तायाः असाधारणत्वं च विरोध उक्त[illegible]दिशा परिहारः। एवमग्रेपि। अद्वितीयं सजातीय
द्वितीयरहितमिति परिहारो विरोधः प्रसिद्धः। साधनं सैन्यं॰ साधनं दापने सिद्धौ मृतदाहे धनेगतौ। उपाये
ऽनुगमे शिश्ने सैन्ये साधकनामयोरिति महीपः। मारणो मृतसंस्कारो गतौ द्रव्योपपादने॥ निर्वर्त्तनोपकर
णानुव्रज्यासु च साधनमित्यमरः। खड्गमात्रं सहायं॰ एतेन युद्धे तदन्यानपेक्षत्वं सूचितं॰ आसभुवन

मंडलं भूमंडलं। यथा दीपक एकदेशस्थः सर्वगृहं प्रभाद्वारा व्याप्नोत्येवमेकदेशस्थः प्रतापाक्रांतभूमंडलोयं
॥ आसनगतं आसनस्थं तं। धनुषि चापे स्थितं हस्तलेन राज्यशास्ता। यथान्यो राजा स्वसिंहासनस्थ एव
राज्यं शास्ति तस्मात्परिभ्रष्टस्तु न किंचित्करः नैवमयं। एतेन केवलमस्त्रावसितविक्षेपक्रियायामेव कुश
लः किंतु धनुर्वेदेपि कुशल इति सूचितम्। केचित्तु आसनं तत्संज्ञकं वृक्षसमूहः तत्र स्थितो धनुषि प्रियाले
स्थितः धनुः संज्ञाप्रियाले हैराशिभेदे शरासने इति विश्वः। यद्वा असनानां बंधूकानां समूह आसनं तत्र
स्थितो धनुषि राशौ इति वदंति विरोधं। ज्वलत्प्रतानलं। अनलस्य वह्नेरिंधनं विना स्थितिर्विरोधः। ज्वल
द्यतिदृढप्रतापानलो यस्य रूपकं। काष्ठं दार्विंधनं त्वेध इध्ममेधः समित्स्त्रियामित्यमरः। आयतलो
चनं विशालनेत्रं सूक्ष्मदर्शनं नेत्रं यस्येति विरोधः। दर्शनं ज्ञानमिति परिहारः। दर्शनालोचनेक्षणानि
त्यमरः। महान् महती महद्वा दोर्दोषा दोर्वा बाहुर्यस्येति परिहारः। दोर्दोषा च भुजो बाहुरिति भुजबाहू प्रवेष्टो

दोरित्यमरः। ककुद्दोषिणीति महाभाष्यं च। एतेन आजानुबाहुत्वं सूचितं। कुपतिः कोः पृथिव्याः पतिरिति परिहारः
।गो-आकुः पृथिवी पृथ्वीत्यमरः। कलत्रं श्रोणिभार्ययोरित्यमरः। दानं मदः विनरणं च पक्षे महो गर्वः। कृष्ण
चरितं मलीमसाचरणं· कृष्णवत् चरितं संधिविग्रहाद्युत्पादनेन स्वकार्यसाधनत्वं यस्य। अकृ स्पहस्तस्थि
तसकलभुवनतलत्वं विशेषः। नञोऽन्यार्थकत्वेन करस्य राजभागपरत्वेन परिहारः। आलोकेत्यस्य सभा गा१४
कुट्टिमम् आजघानेत्यन्वयः। सा मातंगकन्या· जर्जरितमुखभागांशिपिलावयवाधोभागं· येन तदभिमुख
मासीदित्यन्वयः। येन यथा दृश्येनाघातेन· राजकं नृपतिसमूहः। अथ राजकं। राजन्यकं च नृपतिक्षत्रियाणां
गणे क्रमादित्यमरः॥गो-ओक्षोरश्चेत्यादिना समूहे वुञ्· एकपदे· सद्यः। तस्मिन्नैकपदे तुल्ये सद्यः सपदि च स्मृ
तमिति हलायुधः। अवन्तिपतिसुतां ददर्शेत्यन्वयः। तां मातंगकन्यां। वयः परिणामेत्यादि पुरुषविशेषणं
।आकुञ्जावयवस्तारुण्यस्य· काकपक्षः काकपक्षः शिखंडक इत्यमरः। पटा इति भाषायां हारकेणबालके

न॰ तारकोबालकेपिस्याङ्गेदकेप्यभिधेयवत्इतिमेदिनी॥ हरेरितितुल्यार्थैरितिषष्ठी॥ हरिमनुकुर्वतींसंचारिणीं
इतस्ततोगमनशीलांपुत्रिकांपुत्तलिकां॥ आगुल्फं॰ गुल्फंमर्यादीकृत्येत्यागुल्फं॥ आङ्॰ मर्यादाभिविध्योरि
तिसमासः॥ ग्रंथिकेघुटिकेगुल्फावित्यमरः॥ संध्यायाआतपःप्रकाशः॥ प्रकाशोद्योतआतपइत्यमरः॥ दंतपत्रं
गजदंतनिर्मिततनाटंकं॥ आकुरितंलिप्तं॰ ईशानःईश्वरः॥ ईश्वरःशर्वईशानइत्यमरः॥ हलीबलभद्रः॥ तालांकोमु
सलीहलीत्यमरः॥ पिंडालक्तरागःपिंडीभूतोलक्तरसः॥ अचिरंतत्कालंमृदितोमर्दितःमहिषासुरःतस्यरुधिरे
णरक्तौशोणौचरणौयस्यास्तां॥ पल्लवभंगानिवकिसलयभंगानिव॰ पल्लवोस्त्रीकिसलयमित्यमरः॥ भंगो
वि२ जयेपर्यये॥ भेदरोगतरंगेषुइतिमेदिनी॥ आपिंजरेणईषत्पीतेन॰ पिंजरोश्वांतरे पीतेइतिमेदिनी॥ उत्सर्पिणा
ऊर्द्ध्वप्रसर्पणशीलेन॰ जातिशोधनार्थंमातंगजातिशुद्ध्यर्थं॥ आलवालंस्यादालवालमावालमावापइत्यमरः
॥ थालाइतिभाषायां॥ नक्षत्रमालायमानेन॥ सैवनक्षत्रमालास्यात्सप्तविंशतिमौक्तिकैरित्यमरः॥ वस्कतस्कनक्ष

रामः

त्रपदमधिकं।मेखलादाम्ना।स्त्रीकट्यां मेखलाकांचीत्यमरः।पुंडरीकलोचनामित्यादौ समासद्वयेनालंकारद्वयं।प्रा
वृषमिववर्षाद्युव·स्त्रियांप्रावृट्‌स्त्रियांभूम्नि वर्षा इत्यमरः।घनंनिविडं।पक्षे घनंनिविडंच।केशः स्यात्पुंसिवरुणे
ह्रीवेरेकुंतलेपिचेतिमेदिनी।मलयमेखलामलयाचलप्रांतभूमिः।कटकोवा।मेखलाखड्गबंधेस्यात्कांच्यांशै
लनितंबयोरितिमेदिनी।नक्षत्रमालामिवनक्षत्रसंहतिमिव।चित्रश्रवणाभरणैः।चित्राश्रवणाभरणीनक्षत्रैः
भूषितां।चित्रशब्दः चित्रावाचकः।श्रवणशब्दः श्रवणावाचकः।भरणशब्दोभरण्याः।पक्षेचित्रंयत्कुवणाभर
णंतेनभूषितामितिव्याख्यातारः।वस्तुनस्तु प्रक्षिप्तोयंग्रंथः।एककर्णावसक्तदंतपत्रप्रभाधवलितांकपोल
मंडलांउद्यदिंदुकिरणच्छुरितमुखीमिवविभावरीमितिपूर्वग्रंथविरोधात्‌·अथनाटंकातिरिक्तकर्णेदेशा
भरणवर्णनमितिदुराग्रहश्चेत्तर्हिनास्माकमाग्रहः।तदाचित्रंश्रवणंनसंज्ञमाभरणमेवंयोज्यं।हस्तेस्थिताक
मलस्यशोभायस्याः।हस्तस्थितकमलेनशोभायस्याः।मूर्छापक्षेमनोव्यापारहरणमनोहरत्वं।अरण्यभूमि

मिवाश्नतरुभिर्विभीतकतरुभिरुप संपन्ना॰ यद्वा अश्वतरूपाः पशवः तैरुपसंपन्ना॥ त्रिलिंगस्तु विभीतकः॥ नाक्ष
स्तुषः कर्षफलइत्यमरः॥ रूपं स्वभावे सौंदर्ये नाराच पशुशब्दयोरिति विश्वः॥ पक्षे अश्वतसौंदर्यां॥ दिव्ययोषितमि
व देवांगनामिव अकुलीनां कौ पृथिव्यां लीना कुलीना न कुलीना अकुलीना देवतानां रजः संबंधाभावात्॰ पक्षे अ
कुलीनां नीचकुलजां॥ मातंगकुलेन गजसमूहेन दूषितां॰ पक्षे मातंगः श्वपचः॥ गजेपि नागमातंगौ॥ मातंगश्वपचा
वन्तेवासी त्युभयत्रामरः॥ विजातिः॥ विगता जातिः॥ मालती कुसुमं यस्याः॥ अथ पथे च शाण्यौषधवृक्षेभ्यश्चेति चा
द्विकार इति प्रकरणेऽनुदात्तादेरञो पुष्पमूलेषु बहुलमिति लुपि पुष्पे जाति प्रभृतयः स्वलिंगा इत्यमरः॥ स्याच्चै
त्रे चैत्रिको मधुरित्यपि॥ यथा यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलित मालती सुरभयः प्रौढाः
कदंबानिला[redacted]इत्यत्र कविसंप्रदायाद्वसंते सर्वकुसुमवर्णन मध्ये कदंबो वर्णितस्तथा
जात्या अवर्णने स एव हेतुर्मध्यो॰ अस्मिन् मध्ये यानि दूषणानि तानि काव्यप्रकाशदीकायां काव्यलक्ष्म्यां स्पष्टीकृतानि

त्यमरः। थाला इति भाषायां। पादपे रूपशोभितां। हृष्टदम्बुना म्नातसुत्रेण प्रविनीकृतं। आषाढिना पालाश
दण्डधारिणा। पालाशो दण्ड आषाढो व्रत इत्यमरः। प्रस्तुटजं प्रति पर्णशालां। पर्णशालोटजोस्त्रियामित्यम
रः। हरितैः हरितवर्णैः। पालाशो हरितो हरित इत्यमरः। श्यामलीकृतं परिसरं। श्यामीकृतप्रान्तदेशाम्
पर्यन्तभूः परिसर इत्यमरः। बद्धवेणिकया कृतकेशबन्धनया पुनः आप्तजीवनं पतिं प्रतियांसा कृतके
शसंस्कारयेति शृङ्गारो वर्णितो नद्याः पक्षे बद्धप्रवाहया। वेणिः केशस्य बन्धने। नद्यादेरन्तर इति मेदि
नी। यत्र च रामः सुखमुवासेत्यन्वयः। विभ्रमविरामो विलासावसानं। वेनेकिसलयं। पल्लवोस्त्री किस
लयमित्यमरः। जीर्णमृगाः सस्यकवलं धान्यग्रासं न गृह्णन्तीत्यन्वयः॥ घोषस्येति। घोषं शब्दं। अधी
गर्थदयेषामिति कर्मणि षष्ठी। अजस्येत्यादि करुणरसानुभावः। जर्जरितविषाणकोटयोऽप्रस्तगृष्टं
गाः। मृगयानिहतेभ्यः शेषा अवशिष्टाः। विप्रलम्भः विमोहनं। कनकमृगो मारीचः। पिशुनौ सूचकौ।

कवंधः केतुः। तेन युक्तो। कबंधो राक्षसः कबंधोस्त्री। क्रियायुक्तमपमूर्द्ध कलेवरं। क्लीबं जले पुंस्युदरे राहुरक्षो
विशेषयोरिति मेदिनी॥ योजनबाहुर्विराधः। नहुषस्य राज्ञः अजगरकायः सर्पशरीरमिति पुराणं। तस्य चैवंविध
10 स्यागस्त्याश्रमस्य नातिदूरे वेधसाः प्रसादितं जलनिधिरिव वनराजिभिरुद्गीर्णं पंपाभिधानं सर इति संबं
धः। अलयेति। इतः पद्मसरं विशेषयन्नाह। सौगंधिकं सौगंधिकं तु कह्लारमित्यमरः॥ आरसितेति। आर
सितं शब्दितं। सारसाः पक्षिविशेषाः। वाचाटमित्यत्र आलजाटचौ बहुभाषिणि स्यातां। अनिलेन वायुना
उच्चासिता ये कल्लोला महान्तस्तरंगास्तेषां शिशिराः शीतला ये शीकरा अंबुकणास्तैरारब्धं कृतं दुर्दिनं
यत्र। महत्सूल्लोलकल्लोलावित्यमरः। सुषीमः शिशिरो जड इति। शीकरोंबुकणाः स्मृता इति च। मेघच्छन्ने
ह्नि दुर्दिनमिति। आरसितानुमेयैः शब्देन ज्ञातैरित्यर्थः। कादंबः कलहंसे स्यादित्यमरः। कदंबं निकुरंबे स्यादिति
मेदिनी। निकुरंबं कदंबकमिति चामरः। पुलिंदाः हीनजातयः। भेदाः किरातशबरपुलिंदा म्लेच्छजातय इ

मया॥ पक्षे विजातिः विरूद्धा अ[illegible]तिप्रलोभकाद्रूपाद्विरूद्धा जातिः सामान्यं यस्याः। जातिर्जातं च सामान्यमित्यमरः।
मध्यं वलग्नकः। वलग्नकस्तु धनुर्मध्यमित्यमरः। पक्षे मध्यः कटिः। यक्षाधिपः कुबेरः। अलकाया नसूः। अलकापु
म२ रितिकुबेरमकरलोऽर्थः। पक्षे अलकैश्चूर्णकुंतलैरूपशोभिता। अलकाश्चूर्णकुंतलाइत्यमरः। अनिमेषलोच
नो निमेषोन्मेषरहिते लोचने यस्या द्रष्टुरिति। समुपजातविस्मयः संजाताश्चर्यः। अस्थाने अयोग्यस्थाने। रूपनि
ष्पादनं सुरूपनिर्माणं। यत्नः प्रयासः। विधातारं। उभसर्वतसोरितिधिग्योगे द्वितीया। सुरतं संभोगः। पक्षे सुर
ता देवत्वं। तस्य भावस्त्वतलाविति तल्। सुरतासुरसमूहः। ग्रामजनबन्धुभ्यस्तलिति तल् इत्युक्तिः स्कंदीकाका
रस्य वक्रुवैयाकरणतां प्रकटयति। प्रगल्भवनितेव यौवनांधा स्मरोन्मत्ता प्रगल्भा रचयितांगके॥ विलीयमाने
वानंदाइतारंभेप्यचेतने तिदशारूपके॥ मणिकुट्टिमोपविष्टायां भ्राजाज्ञयेत्यादिरस्य। शाङ्गइति। काव्यं तदेतो
षौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापीति काव्यप्रकाशः। नाटकं। पंचसंधि चतुर्वृत्ति चतुःषष्ट्यंगसंयुतं। ष

द्वत्रिंशल्लक्षणोपेतमलंकारोपशोभितं॥महारसंमहाभोगमुदात्तरचनान्वितंमहापूरुषसंचारंसाध्वाचारंजनप्रि
यं॥सुश्लिष्टसंधियोगंचसुप्रयोगंसुखाश्रयं॥मृदुशब्दाभिपातंचकविःकुर्यात्तुनाटकमितिसाहित्यदर्पणे॥गजेत्या
दिपालकाश्मादिशालिहेत्यसामुद्रिकाभिज्ञः॥रत्नमूलःरत्नंस्वजातिश्रेष्ठेपीत्यमरः॥समुद्रवेलेत्यादिपुनरुक्तं
वर्णनं॥असौपुरुषःपद्मश्चचालः॥विहगराजः॥राजाहःसखिभ्यष्टच्इतिटच्॥वर्णस्वरेति॥वर्णोद्विजःस्वरागु
णत्रादयः॥वर्णोद्विजादौशुक्लादौस्तुतौवर्णंतुवाक्षरे॥गुणात्राद्यास्त्वयःस्वराइत्यमरः॥स्तनेति॥भवतोपिपुस्त्रीणां
अश्रुस्नातं·इत्यशोकाग्नेःसमीवर्तिनि·विमुक्ताहारं·विगतोमुक्ताहारोयस्मात्·पक्षेविमुक्तस्त्यक्तआहारो
येनतत्तादृशंस्तनयुगंव्रतमिवचरतीत्युत्प्रेक्षा॥अनुभयाभेदरूपकमभंगश्लेषपर्यायोक्ताअर्थालंकाराः॥
आर्यामात्रावृत्तं॥लक्ष्मैतत्सप्तगणागोपेताभवतिनेहविषमेजः॥षष्ठोयंनलघूवाप्रथमेर्द्धेनियतमार्यायाः॥
षष्ठोद्वितीयलात्परकेन्लेमुखलाच्चसयतिपदनियमः॥चरमेर्द्धेपंचमकेतस्मादिहभवतिषष्ठोलइति॥त्रिंश

केषुपादो लदयोः राघेषु दृश्यते यस्याः॥ पथ्येति नाम तस्याः प्रकीर्तितं नागराजेनेति पादनियमलक्षणभेदार्या
भेदः पथ्येति वृत्तरत्नाकरः। तां· आर्यां। अमरगुरुमिव· बृहस्पतिमिव· अतिवयसं· वृद्धं। अग्रजन्मानं· ब्राह्म
णं। प्रधानभूतं· उत्तमम्। प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि॥ प्रज्ञायामपि च क्लीबमेकत्वे तूत्तमे सदा
॥ स्वरे कंठध्वनौ मधुरता। असंकीर्णः शुद्धपदविभागो यस्यां। संकीर्णं निचिताशुद्धावित्यमरः। उदीरयति·
उच्चारयति। यन्तिरश्चोऽपि पक्षिणोऽपि। संस्कारातिशयः प्रयत्नाधिक्यं। संस्कारः प्रतियत्नेऽपि संकल्पेऽनुभवेऽपि
चेति मेदिनी। अधिधिरक्किरणं· मूर्धा नाडिका· घटिका। पटुपटहध्वनिः। आनकः पटहोऽस्त्री स्यादित्यमरः॥
तं· धं रवध्वनिः॥ आस्थानमंडपात्· सभामंडपात्। आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदइत्यमरः॥
शान्ति चलति सति महीपतीनां संभ्रम आसीदित्यन्वयः। अंगदेति· केयूरमंगदं तुल्ये इत्यमरः। पटवासधूलिः·
पिष्टातः पटवासकइत्यमरः। चंदनादिसुगंधिद्रव्यचूर्णं भाषायां बूका इति प्रसिद्धं। अहमहमिका परस्पराहं

कारः।अहमहमिकातुसास्यात्परस्परंयोभवत्यहंकार इत्यमरः।आलस्यात्सौसुखं।आलस्ये प्रार्थनौत्सुक्ये इत्य
मरः।प्रेंखोलिताश्चलिताहारलतायेषांतेषां।तस्मिन्समये आस्थानभवनं क्षुभितमिवाभदित्यन्वयः।इतश्च
तश्चेति।निष्पतंतीनां यातायातं कुर्वतीनां।जघनस्यास्फालनं परस्पराघातः।भवनदीर्घिका गृहवापिका।
भवनागारमंदिरं।वापीतुदीर्घिकेत्युभयत्रामरः।रसनायाः कांच्याः।रसितं शब्दस्तेनोत्सुकितानां सोत्कंठा
नां।स्त्रीकट्यां मेखला कांचीसप्तकी रसनातथेत्यमरः।अमूर्विमानांतरलंबिनीनां श्रुत्वा स्वनं कांचनकिं
किणीनां॥प्रत्युद्व्रजंतीव खमुत्पतंत्यो गोदावरीसारसपंक्तयस्त्वामिति कालिदासः।रसनाजिह्वा तस्याः
रसितमिति व्याख्यानं तु प्रामादिकं।उज्जिघ्यमानकांस्यकेंकारः तादृक् शब्दस्तद्वद्दीर्घेण सारसानां प
क्षिणां कूजितेन पुष्कराह्वस्तु सारस इत्यमरः।सारहंस इति भाषायां प्रसिद्धः।निर्घातस्यांतरिक्षोत्पातस्य
निर्घोषः शब्दस्तद्वद्गंभीरेण।निर्घातोग्रैः कुंजलीनान् गुहाभ्यो ज्यानिर्घोषैः क्षोभयामास सिंहान्॥ अस्य

पं

व्याख्यांसंजीविन्यांनिर्घातोव्योमोत्थितऔत्पातिकः।शब्दविशेषस्तद्गुणैरित्युल्लिखन्मल्लिनाथः।तत्रशब्द
लक्षणाबोध्या॰अन्यथाप्रकृतकादंबरीग्रंथेननिर्घातनिस्वनोघोषोजितवानवनीपतइतिमार्कंडेयपु
राणेनसहविरोधापत्तेः।पवनःपवनाभिहतोगगनवद्वनौसमासमापतति॥भवतितदानिर्घातःपाप
दीप्तखगविरुतइतिवराहमिहिरः॥तारतरदीर्घेण॰अत्युच्चैर्दीर्घेण।तारोत्युच्चैरित्यमरः।दीर्घतरस्य
भावोदीर्घतरता॰तां॰दंतुराभिः॰विषमांतराभिः॰दंतुरोविषमांतरेइतिविश्वप्रकाशः।उन्नताभिरितिआस्मांत
दंतुनिर्मूलम्॰रणरणायितानां॰सशब्दानामितियावत्॥आलोकशब्दः।राजसमीपंसमागतानांराजविलोक
नप्रवर्त्तकः।जयशब्दइतिव्याख्यासमाधुः।अग्रिममूलविरुद्धत्वात्॰कालिदाससम्मतिस्तुअस्मदुक्तार्थे॥
आलोकोदर्शनोद्योतावित्यमरः।प्रवृत्तैश्चलितैः।क्षुभितमिवक्षोभंप्राप्तमिव॥अथनरपतिःअभ्यंतरंप्रा
विशदित्यन्वयः॥अपनीतेति॰आयामभूमिमयासीदित्यन्वयः।अयासीदगच्छत्॥गगनाभोगो॰नभोमंडलः

।आभोगो वारुणे छत्रे पूर्णतायत्नयोरपीति विश्वमेदिन्यौ।आभोगः परिपूर्णतेत्यमरः।कूजतः मधुरः स्वरस्यानुद्दे
गजनको व्यायामो मदश्च विद्यान्तितनं येन सः।स्वादुप्रियौ च मधुरावित्यमरः।सिंदुवारः निर्गुंडी।सिंदुवारेंद्र
सुरसौ निर्गुंडी इन्द्राणिकेत्यपीत्यमरः।मेवडी इति भाषायां।विडंबनं अनुकरणं·मूर्त्तिः शरीरं।मूर्त्तिः काठिन्यका
ययोरित्यमरः।उपदिश्यमानमार्गः स्नानभूमिमगच्छदित्यन्वयः।समुत्सारणं निवारणं।दंडिभिः स्वाधिका
रसूचकैर्दंडधरैः।श्रेणीसनाथमध्यां।अंबुवाहिनीयुक्तमध्यां।श्रेणी काष्ठांबुवाहिनीत्यमरः।कर्पटः।नक्त
कः।समौ नक्तककर्पटावित्यमरः।रूमाल इति भाषायां प्रसिद्धः।सममन्तात् समुपतस्थुर्वारयोषित इत्यन्वयः
।सुगंधाय आमलकाः सुगंधद्रव्यसहिता मलकफलानि तैरुपलिप्तशिरसः।अंशुकेन निविडं निबद्धस्तन
भ्रांताः।बंधनं तु राज्ञोपर्यंचपातनिवृत्तये स्तनस्यंदनिवृत्तये च·समुत्क्षिप्तकर्णाभरणाः।उत्क्षारितकर्णभू
षणाः।कर्णाभरणोत्तारणे हेतुः पूर्व एव·कर्णसंगे कर्णशिरांतराले·उत्सारिताः स्थापिताः अलकाः क

रामः
१२

र्णपुरोभागलंबिनोऽलकाश्चूर्णकुंतलाः। अलकाश्चूर्णकुंतलाइत्यमरः। जुल्फइतिभाषाप्रसिद्धा। याभिस्नाः। त
तस्ताश्चभिषिषिचुरित्यन्वयः। सलिलयंत्रं। फुहारापिचकारीवाइतिभाषायां। जाउंभैसं। सुषीमः शिशि
रजडइत्यमरः। अनंतरंध्वनिरूद्रपादित्युत्पन्नः। चिएतेपदइतिचिलिचिलोलुगितितशाहृस्यलुक्। क्षतिप
थंश्लोचरप्रं। झल्लरीडुडुकं। झल्लरीझलरीहूचडुडुकंचक्रवालकइत्यमरश्यामरव्यायांसुधारव्यायांकोशः। नि
र्मोकपरिलघुनीसर्पकंचुकयदलघून्माने। [redacted] समौ कंचुकनिर्मोकावितिसर्पप्रकरणेऽमरः। दुकूलपदृत्व
वेनदुकूलांचलेन। पल्लवः किसलयेंऽचलेइतिमेदिनी। झंकारिभिः सशब्दैः अलिकदंबकैः भ्रमरवृंदैः। निकु
रंबकदंबकमित्यमरः। अनुबध्यमानोगृह्यमाणः परिमलोविमर्दजन्माजनमनोहरोगंधोयस्याः। विमर्दोत्थे
परिमलोगंधेजनमनोहरइत्यमरः। मृगमदेत्यादि। कस्तूरीकर्पूरकेसरैः सुरभिणा। मृगनाभिर्मृगमदः क

स्त्रीच।अथकुंकुमं।काश्मीरजन्माग्निशिखमिति।सुरभिघ्राणतर्पण इति त्रिष्वमरः।विरचितआमोदिमाल
तीकुसुमशेखरोयेन।शिखावसक्तातिसुगंधिमालतीमालः।शिखास्यापीडशेखरावितिमालाप्रकरणे
ऽमरः।कृतांबरस्यवाससःपरिवर्त्तोयस्ययःपूर्वंपरिहितस्यत्यागोपरस्यपरिधानंयेनसः।उपस्पृश्या
चम्य·उपस्पर्शस्त्वाचमनमित्यमरः।प्रमृष्टमणिकुट्टिमात्·धौतमणिकुट्टिमात्·प·अत्रिः।आचांतोप्यशु
चिस्तावद्यावत्पात्रमनुद्धृतम्·उद्धृतेप्यशुचिस्तावद्यावन्नोमृज्यतेमही॥भूमावपिहिलिप्तायांतावत्स्याद
शुचिःपुमान्॥आसनादुत्थितस्तस्माद्यावन्नस्पृशतेमहीमिति॥अति जरठंकठोरं।जरठंमूर्त्तिमन्मूर्त्ते
प्रवृद्धंप्रौढमेधितमि त्यमरः॥अनुगम्यमानःआस्थानभवनमयासीदित्यन्वयः।जवनिकातिरस्क
रणी।प्रतिसीराजवनिकास्यात्तिरस्करणीचसेत्यमरः।मसहरीतिभाषायांप्रसिद्धिः।उत्कीर्णैःलिखितैः
शालभंजिकानांपुत्तलिकानांनिवहःसमूहोयत्र।शालभंजीपांचालिकापुत्रिकेतिहेमः।स्तंभसंचयेन· रामः
१३

स्तंभचतुष्केण। कुसुमामोदेन वासितो भावितः प्रच्छदपटो निचोलो यस्य। भावितं वासितं त्रिषु। निचोलः प्रच्छ
दपट इत्युभयत्राप्यमरः। पटेनच्छन्नमुपधानमुपबर्हस्तेनाध्या सितं शिरोधाम शिरःस्थानं यस्य। उपधी
यते शिरो ऽत्रेत्युपधानमधिकरणे ल्युट्। उपधानं तूपबर्ह इत्यमरः। मणिमयाः प्रतिपादुका स्तासु प्रति
निक्षिप्ताः पादा यस्य। प्रतिपादुका इति भाषायां प्रसिद्धं। पार्श्वस्थः रत्नपादपीठो यस्य। शयनीयेन पल्यंकेन।
शय्यायां शयनीयवत् शयनं मंचपर्यंकपल्यंका इत्यमरः। तत्र शयनतलनिषण्ण आसांचक्रे इत्यन्वयः।
शय्यातले निषण्णः पर्यंकोपर्युपविष्टः। स्वरूपे ऽङ्घ्र्यधरयोः खड्गमुष्टिश्च पदयोः। तलं ताले तरौ तद्धक्रो
धायामपि नद्वयोरिति महीपः। उत्संगः त्वंकः। उत्संगः प्राग्भागो वपुष इत्युक्त इति हलायुधः। आसितवता
स्वङ्गः। ततः शयनीयोपवेशनानंतरं वैशंपायनं शुकं आदाय गृहीत्वा आगच्छेति प्रतीहारीमादिदे
शेत्यन्वयः। अथ राजाज्ञानंतरं वैशंपायन आजगामेत्यन्वयः। किंचिदवनतपूर्वकायेन वार्द्धक्यभारं

भादिति भावः। कंचुकिना· सौविदल्लेन। सौविदल्लाः कंचुकिनः इत्यमरः। कच्चिदिति प्रश्ने· कामप्रवेदने कच्चिदित्यम
रः। अशनजातं भक्ष्यमात्रं सर्वं भक्ष्यमित्यर्थः। नीलपाटलो नीलरक्तः। कषायमधुरः। तादृशरसद्वयविशिष्टा मिर
14 नि। तुवरस्तु कषायोऽस्त्री इत्यमरः। मुक्ताफलानिपिनलिनीदलहरितानीति· अत्रलिटूहरितत्वशब्दयोर्हलं तत्वा
सौफलं तल्लक्षणं तु न। अमृतायते सुधावदाचरति। आवेदयतु· कथयतु। कात्स्न्येन साकल्येन। विश्वमशे
षं कृत्स्नं समस्तनिखिलाखि[illegible]लानि निःशेषमित्यमरः। लुब्धो गृध्नुः। लुब्धं तु रहसि क्लीबं छादिते वाच्यलिंग
कमिति मेदिनी। उषितं स्थितं। अस्ति विंध्याटवी नाम। पूर्वापरजलनिधिवेलयोरवलग्नो देशः प्रदेशो यस्याः।
मध्यदेशेति तु पाठोपपाठः। वनकूरी स्यादि। अत्र हेत्वलंकारः। हेतोर्हेतुमता सार्द्धं हेतुमित्यभिधीयत इति। मे
खला कांची। मेखला कांची सप्तकी रसना तथेत्यमरः। विकचं· प्रफुल्लं। कुररः। उत्क्रोशः। उत्क्रोशकुररौ सम
मावित्यमरः। यत्तु टिटिरीति भाषायामिति टीकाकारेणोक्तं तन्न। तस्य पक्षांतरत्वात्। करिणश्च कलभा

श्यातेषां करैः शुंडाभिः मृदिततमालकिसलयामोदिनी। केरली केरलदेशभवा स्त्री तस्याः कपोलो गंडदेशः तद्वत्को
मलस्तु विनालतुल्यमार्दवस्निग्धतायुक्तेनेत्यर्थः। पल्लवप्रचयेन किसलयसमूहेन। पुंकेसरादिलतामंडपे
विराजितेसन्वयः। कक्कोलं कोषफलं। कक्कोलकं कोषफलमित्यमरः। गेफुलाइति भाषायां। पथिकजनेन
रचितलवंगपल्लवैः संस्तरश्चास्तरणं यत्र। कालिदासविरुद्धमिदं वर्णनं। अनेन सार्द्धं विहरांबुराशेस्तीरे
षुतालीवनमर्मरेषु। द्वीपांतरानीतलवंगपुष्पैरपाकृतस्वेदलवामरुद्भिरिति। करिकेसरो नागकेसरः। केस
रो नागकेसरः कांचनाह्वयः इत्यमरः। तांबूली तांबूलवल्ली। तांबूलवल्ली नागवल्ल्यपीत्यमरः। तांबूलीनां दलै
स्तत्ररचिताः पानभूमय इति रघुवंशात् अत्तापरमधिकम्। पूगाः क्रमुकाः तेषां खंडः समूहः। पूगस्कन्दः क्रमु
कः। अत्र आदिकरं वै खंडमस्त्रियामित्युभयत्रामरः। षंडपर्यायः खंडशब्दोपि प्रसिद्धो बहुत्र। उन्मदेति। त
त्रा राजातिहंतारो सिंहव्याघ्रगजादिजा इति प्रसिद्धैरनेकेषां सिंहाद्यस्थितेरभावादेकस्य तादृशस्य सर्व

सं

कालमेकत्रावस्थितेरं भा[illegible]वात्प्रस्रवणाः प्रसिद्धिः।महर्षिप्रभावात्स्थलमहिम्नावा पूर्वोक्तहेतुद्वयाभावेनुप्र
सिद्धिः स्फुटैव।प्रस्रवणमुत्सः।उत्सः प्रस्रवणमित्यमरः।प्रस्रवंत्यापोनेनप्रस्रवणं॰करणेल्युट्।यत्रनि
15 र्झरजलंसंघीभूयनिःसरतिसदेशः।मदगंधिभिर्वैलालतावनेन॰सिद्धविषयाहेतूत्प्रेक्षा।एतेनात्रगंध
गजप्राचुर्यंसूचितं।नखमुखंनखाग्रंतद्भग्नहस्तिकुंभलग्नमुक्ताफल[illegible]र्थैः।शबरोम्लेछजातिविशेषः तु ४
।।प्रेताधिपपुरी॰यमपुरी॰संयमिनी।सदासन्निहितमृत्युनासमीपनिधनेनभीषणाभयानका॰पक्षेमृ
त्यवोवृक्षविशेषाः।महिषेणयमवाहनेन॰पक्षेमहिषैः आरण्यकैः कासरैः।पूर्वासमानोपमा॰द्वितीयाश्ले
षोपमा।।समास[illegible]शब्दवाच्यत्वात्साससमासोपमामता।।श्लेषेणकथनं श्लेषोपमाइतिदंडी।एवमग्रेपिय
थासंभवंज्ञेयं।समरेसंग्रामेउद्यतापताकिनीसेनातद्वत्।बाणा-अस्यंतेनेनेतिबाणासनंधनुस्तत्रारो
पिताः शिलीमुखाबाणायत्र।विमुक्तः कृतः सिंहनादोयया।पक्षेबाणा-असनाश्चयेवृक्षास्तेषुआरोपि

राम:
१५

ताःस्थिताःशिलीमुखायस्याःसा।सिंहनादःवीरगर्जनं।पक्षेविमुक्तःसिंहैर्नादोयत्र।अलिवाणौशिलीमु
खावित्यमरः।खड्गोसिः।पक्षेखड्गोगंडकः।खड्गोगंडकशृंगासिबुद्धभेदेषुगंडकइतिमेदिनी।रक्तमेवचंदनं।पक्षे
रक्तचंदनं।कल्लीसुतःकरटकःस्तेयशास्त्रस्यकारकइतिवैजयंती।कल्लीसुतोमूलदेवोमूलभद्रःकलांकुरइ
तित्रिकांडशेषः।विपुलाचलनामकौश्रेष्ठिनौ।यद्वाविपुलाकाचनस्त्री।पक्षेविपुलाचलाविपुलपर्वताः।श
शोमूलदेवभ्राता।पक्षेशशकाः।कल्लीसुतःकरटकःस्तेयशास्त्रप्रवर्तकः॥तस्याख्यातौसखायौद्वौविपु
लाचलसंज्ञकौ।शशश्चमंत्रिप्रवरइतिबृहत्कथायां।घनरसेति।नीलकंठःशिवः।पक्षेमयूरः।पल्लववदरु
णा।पक्षेपल्लवैःकिसलयैररुणारक्ता।अमृतेति।श्रीद्रुमःपारिजातः।पक्षेश्रीर्लक्ष्मीर्द्रुमःकल्पतरुः।वा
रुणीमदिरा।पक्षेश्रीद्रुमाःफलपुष्पपल्लवशोभिताःबिल्ववृक्षावा।वारुणीगंडदूर्वा।वारुणीगंडदूर्वायां
प्रतीचीसुरयोरपीतिमेदिनी।अथवावारुणीपश्चिमदिक्॥प्रावृडिति॥घनैर्मेघैःश्यामला।पक्षेघनवत्श्या

मला। घनै मुक्ताभिर्वा। कालश्यामलमेचका इत्यमरः। मुक्तामुद्गरमेघेषु त्रिषु क्लीबे पुमान्घन इति रत्नमाला। अ
नेकशतह्रदाभिर्विद्युद्भिः। शंपाशतह्रदा ह्रादिनीत्यमरः। पक्षे अनेकशतैः ह्रदैः अलंकृता। नद्यागाधजलो ह्रद इ
1b त्यमरः। चं इति। सूक्ष्मसार्थैः नक्षत्रसमूहैः। नक्षत्रमृक्षं भं तारेत्यमरः। पक्षे ऋक्षैः भालूकैः। ऋक्षाच्छभल्लभाल्ल
का इत्यमरः। हरिणेन मृगेण। पक्षे हरिणा सिंहेन। हरिणैर्वा। राज्येति। चमरमृगस्य वालव्यजनेनोपशोभिता
पक्षे चमराः तदाख्याः पशवो मृगा हरिणाः। वालानां वीनां पक्षिणां अजनेन गत्या शोभिता। अज गतौ भावे ल्यु
ट्। वायाविति वी भावा भावः। समरेति। समो द्वयोः। गिरितनयेति। स्थाणुर्निष्पत्रकाण्डस्तरुः। पक्षे शिवः। स्था
णुः कीलहरौ पुमानिति मेदिनी। मृगपतिः सिंहोऽर्थद्वयेपि। जानकीति। प्रसूतौ कुशलवौ तदाख्यौ पुत्रौ। पक्षे प्र
सूतकुशलवा प्रादुर्भूतदर्भांकुरा। निशाचरैः रात्रिचारिभिः। जंबुकपेचकादिभिः परिगृहीता। पक्षे निशाचरो
रावणः। कामिनीति। तिलकं चित्रकं। पक्षे अगुरुतिलकौ वृक्षौ। सोल्कं ठेति। मदनः वृक्षः। पक्षे कामः। मदनासिक्थ

रामः

धत्तूरवसंतद्रुममन्मथाइतिरत्नमाला।बालेति।गंडकः।अरिष्टनाशकयंत्रमंत्रादिसहितोवस्त्रादिनिर्मि
17 तः।गंडाइतिभाषायां।पक्षेगंडकःखड्गः॥पानेति॥मधुमद्यंपुष्परसश्च।कोशाःपट्टसूत्रस्थानानिपात्राणि
च॥दशमुखेति॥शालाःवृक्षाः।अनोकहःकुटःशालइत्यमरः।पक्षेशालाःगृहैकदेशाःप्राकारश्च।काका
रोद्धरणाःशालइत्यमरः।उद्धृतेति॥मृगपतिःसिंहः।कंटकितासरोमांचा।भयानकरसानुभावः।प
क्षेकंटकयुक्ता।मत्तेति॥प्रलापःशाहृः।पक्षेप्रलापोनर्थकवचनं।उन्मत्तेति।तालोवृक्षःकरास्फा
लनंच।तालोगीतक्रियामानेकरास्फोटद्रुमेदयोरितिमहीपः॥विधवेति॥तालानांपत्राणि।पक्षे
कर्णाभरणं।कर्णिकातालपत्रंस्यादित्यमरः।समरेति॥शराःबाणाः।पक्षेशराःसरहरीतिभाषा
प्रसिद्धाःस्तंबाः॥अमरपतीति॥नेत्राणिमूलानिनयनानिच।नेत्रंमंथगुणेवस्त्रेतरुमूलेविलो
चनइतिविश्वः॥अवनीति॥दौवारिकहस्तगतवेत्रयष्टिशतेन।पक्षेवेत्रलताभिः॥विराटेति।की

चकाः पुरुषविशेषाः। सक्षसा वा। पक्षे कीचका वेणवः। वेणवः कीचकास्ते स्युर्ये स्वनंत्यनिलोद्धता इ
त्यमरः। अंबरेति। व्याधेन मृगवधाजीवेनानुगम्यमाना। अत एव तरलाता रकाक्षिकनीनिका येषां ता
दृशा मृगा यत्र। भयानकरसानुभावोयं। पक्षे व्याधेन तद्रूपेण हरेण अनुगम्यमाना तरलस्तारका मृगो मृ
गशीर्षनक्षत्रं यत्र॥ गृहीतेति। चीरं तु गोस्तनेवस्त्रे चंडायां मीसपत्रके इति विश्वः महीपो। जटा लग्नकचे मूले
मांस्यां ऌक्षे पुनर्नवे इति मेदिनी। वल्कं वल्कलमस्त्रियामित्यमरः। क्रूरैः सत्वोऽसत्वो स्यात्तस्य मुनिजनैः। वि
लमप्रसिद्धमतेषां शांतिप्रधानत्वात्तु। इष्यासु व्यवसायेषु पि सत्वमस्त्री पुजंतु षित्यमरः। इति विरोधः। क्रूराः
सत्वा जंतवो यस्यामिति परिहारः। पुष्पवतीति। पुष्पवत्सा रजस्वलायां नपवित्रत्वं। पुष्पाणि कुसुमानि तद्वती
ति परिहारः। विंध्याटव्यामगस्त्यस्याश्रमपदमासीदित्यन्वयः॥ मुनिविशेषणानि दंडकेत्यादि॥ विशेषक
स्य तिलकस्य। तिलकं चित्रकाणि विशेषकमित्यमरः। आलवालैरावालैः। स्या ॰। लवालमावालमावापद्

रामः
१०

स्मरः॥ अथवनराजिंविशिनष्टि। आविरलेति। ऋष्यमूकः पर्वतविशेषः। सुग्रीवस्थानं। उदवासिनः। उदके
वसंतितेउदवासिनः। पेषंवासवाहनधिषुवेत्सुदादेश उदकस्य। जलचरपतगाः जलपक्षिणः। रथ्याचा
रिणावनातभ्रमणकारिणापथिकेनेत्यर्थः। पद्मसरसः पश्चिमेतीरेतरुखंडस्यसमीपेस्तिशाल्म
लीवृक्षइतिसंबंधः। दिग्गस्यकरः शुंडादंडः। अनिलोवायुस्तेनवेल्लितैरास्फालितैः निर्मोकैः। निर्मोको
मोचनेव्योम्निसन्नाहेसर्पकंचुकेइतिमेदिनी॥ विप्रकीर्णेनप्रसृतेन। उडुपतिश्चंद्रः॥

~~काव्यप्रकाशः~~

पत्रे ९८

